# Shri Sitasahasranamavali

# श्रीसीतासहस्रनामावलिः

## Document Information

Text title : Sita Sahasranamavali 1 from Adbhutaramayana

File name : sItAsahasranAmAvalIadbhutarAmAyaNa.itx

Category : devii, devI, sItA, sahasranAmAvalI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : See the corresponding stotra. Sahasranama stotrasangraha, Gita Press

Source : adbhutarAmAyaNAntargatam adhyAya 25

Latest update : February 5, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 2, 2024

*sanskritdocuments.org*

# श्रीसीतासहस्रनामावलिः

ॐ सीतायै नमः । उमायै । परमायै । शक्त्यै । अनन्तायै । निष्कलायै ।
अमलायै । शान्तायै । माहेश्वर्यै । शाश्वत्यै । परमाक्षरायै ।
अचिन्त्यायै । केवलायै । अनन्तायै । शिवात्मने । परमात्मिकायै ।
अनादये । अव्ययायै । शुद्धायै । देवात्मने नमः । २०

ॐ सर्वगोचरायै नमः । एकानेकविभागस्थायै । मायातीतायै ।
सुनिर्मलायै । महामाहेश्वर्यै । शक्तायै । महादेव्यै । निरञ्जनायै ।
काष्ठायै । सर्वान्तरस्थायै । चिच्छक्त्यै । अतिलालसायै । जानक्यै ।
मिथिलानन्दायै । राक्षसान्तविधायिन्यै । रावणान्तकर्यै । रम्यायै ।
रामवक्षःस्थलालयायै । उमायै । सर्वात्मिकायै नमः । ४०

ॐ विद्यायै नमः । ज्योतिरूपायै । अयुताक्षरायै । शान्त्यै ।
प्रतिष्ठायै । सर्वेषां निवृत्त्यै । अमृतप्रदायै । व्योममूर्त्यै ।
व्योममय्यै । व्योमधारायै । अच्युतायै । लतायै । अनादिनिधनायै ।
योषायै । कारणात्मने । कलाकुलायै । नन्दप्रथमजायै । नाभ्यै ।
अमृतस्यान्तसंश्रयायै । प्राणेश्वरप्रियायै नमः । ६०

ॐ मातामह्यै नमः । महिषवाहनायै । प्राणेश्वर्यै । प्राणरूपायै ।
प्रधानपुरुषेश्वर्यै । सर्वशक्त्यै । कलायै । काष्ठायै ।
इन्दवे । ज्योत्स्नायै । महिमायै । आस्पदायै । सर्वकार्यनियन्त्र्यै ।
सर्वभूतेश्वरेश्वर्यै । अनादये । अव्यक्तगुणायै । महानन्दायै ।
सनातन्यै । आकाशयोनिर्योगस्थायै ? । सर्वयोगेश्वरेश्वर्यै नमः । ८०

ॐ शवासनायै नमः । चितान्तःस्थायै । महेश्यै । वृषवाहनायै ।
बालिकायै । तरुण्यै । वृद्धायै । वृद्धमात्रे । जरातुरायै ।
महामायायै । सुदुष्पूरायै । मूलप्रकृत्रीश्वर्यै । संसारयोन्यै ।
सकलायै । सर्वशक्तिसमुद्भवायै । संसारसारायै । दुर्वारायै ।
दुर्निरीक्ष्यायै । दुरासदायै । प्राणशक्त्यै नमः । १००

ॐ प्राणविद्यायै नमः । योगिन्यै । परमायै । कलायै । महाविभूत्यै ।
दुर्धर्षायै । मूलप्रकृतिसम्भवायै । अनाद्यनन्तविभवायै ।
परात्मने । पुरुषाय बलिने । सर्गस्थित्यन्तकरिण्यै । सुदुर्वाच्यायै ।
दुरत्ययायै । शब्दयोन्यै । शब्दमय्यै । नादाख्यायै । नादविग्रहायै ।
प्रधानपुरुषातीतायै । प्रधानपुरुषात्मिकायै । पुराण्यै नमः । १२०

ॐ चिन्मय्यै नमः । पुंसामादये । पुरुषरूपिण्यै । भूतान्तरात्मने ।
कूटस्थायै । महापुरुषसंज्ञितायै । जन्ममृत्युजरातीतायै ।
सर्वशक्तिसमन्वितायै । व्यापिन्यै । अनवच्छिन्नायै । प्रधानायै ।
सुप्रवेशिन्यै । क्षेत्रज्ञायै । शक्त्यै । अव्यक्तलक्षणायै ।
मलवर्जितायै । अनादिमायासम्भिन्नायै । त्रितत्त्वायै । प्रकृत्यै ।
गुणाय नमः । १४०

ॐ महामायायै नमः । समुत्पन्नायै । तामस्यै । पौरुष्यै । ध्रुवायै ।
व्यक्ताव्यक्तात्मिकायै । कृष्णायै । रक्तशुक्लायै । प्रसूतिकायै ।
स्वकार्यायै । कार्यजनन्यै । ब्रह्मास्यायै । ब्रह्मसंश्रयायै ।
व्यक्तायै । प्रथमजायै । ब्राह्म्यै । महत्यै । ज्ञानरूपिण्यै ।
वैराग्यैश्वर्यधर्मात्मने । ब्रह्ममूर्तये नमः । १६०

ॐ हृदिस्थितायै नमः । जयदायै । जित्वर्यै । जैत्र्यै ।
जयश्रियै । जयशालिन्यै । सुखदायै । शुभदायै । सत्यायै ।
शुभायै । सङ्क्षोभकारिण्यै । अपां योन्यै । स्वयम्भूत्यै । मानस्यै ।
तत्त्वसम्भवायै । ईश्वराण्यै । सर्वाण्यै । शङ्करार्द्धशरीरिण्यै ।
भवान्यै । रुद्राण्यै नमः । १८०

ॐ महालक्ष्म्यै नमः । अम्बिकायै । माहेश्वर्यै । समुत्पन्नायै ।
भुक्तिमुक्तिफलप्रदायै । सर्वेश्वर्यै । सर्ववर्णायै । नित्यायै ।
मुदितमानसायै । ब्रह्मेन्द्रोपेन्द्रनमितायै । शङ्करेच्छानुवर्तिन्यै ।
ईश्वरार्द्धासनगतायै । रघूत्तमपतिव्रतायै । सकृद्विभावितायै ।
सर्वसमुद्रपरिशोषिण्यै । पार्वत्यै । हिमवत्पुत्र्यै ।
परमानन्ददायिन्यै । गुणाढ्यायै । योगदायै नमः । २००

ॐ योग्यायै नमः । ज्ञानमूर्तिर्विकासिन्यै । सावित्र्यै । कमलायै ।
लक्ष्म्यै । श्रियै । अनन्तोरसिस्थितायै । सरोजनिलयायै । शुभ्रायै ।
योगनिद्रायै । सुदर्शनायै । सरस्वत्यै । सर्वविद्यायै ।

जगज्ज्येष्ठायै । सुमङ्गलायै । वासव्यै । वरदायै । वाच्यायै ।
कीर्त्यै । सर्वार्थसाधिकायै नमः । २२०

ॐ वागीश्वर्यै नमः । सर्वविद्यायै । महाविद्यायै । सुशोभनायै ।
गुह्यविद्यायै । आत्मविद्यायै । सर्वविद्यायै । आत्मभावितायै । स्वाहायै ।
विश्वम्भर्यै । सिद्ध्यै । स्वधायै । मेधायै । धृत्यै । श्रुत्यै ।
नाभ्यै । सुनाभ्यै । सुकृत्यै । माधव्यै । नरवाहिन्यै नमः । २४०

ॐ पूजायै नमः । विभावर्यै । सौम्यायै । भगिन्यै । भोगदायिन्यै ।
शोभायै । वंशकर्यै । लीलायै । मानिन्यै । परमेष्ठिन्यै ।
त्रैलोक्यसुन्दर्यै । रम्यायै । सुन्दर्यै । कामचारिण्यै ।
महानुभावमध्यस्थायै । महामहिषमर्दिन्यै । पद्ममालायै ।
पापहरायै । विचित्रमुकुटाननायै । कान्तायै नमः । २६०

ॐ चित्राम्बरधरायै नमः । दिव्याभरणभूषितायै । हंसाख्यायै ।
व्योमनिलयायै । जगत्सृष्टिविवर्द्धिन्यै । निर्यन्त्रायै ।
मन्त्रवाहस्थायै । नन्दिन्यै । भद्रकालिकायै । आदित्यवर्णायै ।
कौमार्यै । मयूरवरवाहिन्यै । वृषासनगतायै । गौर्यै । महाकाल्यै ।
सुरार्चितायै । अदित्यै । नियतायै । रौद्र्यै । पद्मगर्भायै नमः । २८०

ॐ विवाहनायै नमः । विरूपाक्ष्यै । लेलिहानायै । महासुरविनाशिन्यै ।
महाफलायै । अनवद्याङ्ग्यै । कामपूरायै । विभावर्यै ।
विचित्ररत्नमुकुटायै । प्रणतर्धिविवर्धिन्यै । कौशिक्यै । कर्षिण्यै ।
रात्र्यै । त्रिदशार्त्तिविनाशन्यै । विरूपायै । सुरूपायै । भीमायै ।
मोक्षप्रदायिन्यै । भक्तार्त्तिनाशिन्यै । भव्यायै नमः । ३००

ॐ भवभावविनाशिन्यै नमः । निर्गुणायै । नित्यविभवायै । निःसारायै ।
निरपत्रपायै । यशस्विन्यै । सामगीत्यै । भावाङ्गनिलयालयायै ।
दीक्षायै । विद्याधर्यै । दीप्तायै । महेन्द्रविनिपातिन्यै ।
सर्वातिशायिन्यै । विद्यायै । सर्वशक्तिप्रदायिन्यै । सर्वेश्वरप्रियायै ।
तार्क्ष्यै (वार्क्ष्यै) । समुद्रान्तरवासिन्यै । अकलङ्कायै ।
निराधारायै नमः । ३२०

ॐ नित्यसिद्धायै नमः । निरामयायै । कामधेनवे । वेदगर्भायै ।
धीमत्यै । मोहनाशिन्यै । निःसङ्कल्पायै । निरातङ्कायै । विनयायै ।
विनयप्रदायै । ज्वालामालासहस्राढ्यायै । देवदेव्यै । मनोन्मन्यै ।

उर्व्यै । गुर्व्यै । गुरवे । श्रेष्ठायै । सुगुणायै । षड्गुणात्मिकायै ।
महाभगवत्यै नमः । ३४०

ॐ भव्यायै नमः । वसुदेवसमुद्भवायै । महेन्द्रोपेन्द्रभगिन्यै ।
भक्तिगम्यपरायणायै । ज्ञानायै । ज्ञेयायै । जरातीतायै ।
वेदान्तविषयायै । गत्यै । दक्षिणायै । दहनायै । बाह्यायै ।
सर्वभूतनमस्कृतायै । योगमायायै । विभावज्ञायै । महामोहायै ।
महीयस्यै । सत्यायै । सर्वसमुद्भूत्यै । ब्रह्मवृक्षाश्रयायै नमः । ३६०

ॐ मत्यै नमः । बीजाङ्कुरसमुद्भूत्यै । महाशक्त्यै । महामत्यै ।
ख्यात्यै । प्रतिज्ञायै । चिदे । संविदे । महायोगेन्द्रशायिन्यै ।
विकृत्यै । शाङ्कर्यै । शास्त्र्यै । गन्धर्वयक्षसेवितायै ।
वैश्वानर्यै । महाशालायै । देवसेनायै । गुहप्रियायै । महारात्र्यै
(महाराष्ट्र्यै) । शिवानन्दायै । शच्यै नमः । ३८०

ॐ दुःस्वप्ननाशिन्यै नमः । पूज्यायै । अपूज्यायै । जगद्धात्र्यै ।
दुर्विज्ञेयस्वरूपिण्यै । गुहाम्बिकायै । गुहोत्पत्त्यै । महापीठायै ।
मरुत्सुतायै । हव्यवाहान्तरायै । गार्ग्यै । हव्यवाहसमुद्भवायै ।
जगद्योन्यै । जगन्मात्रे । जन्ममृत्युजरातिगायै । बुद्ध्यै । मात्रे ।
बुद्धिमत्यै । पुरुषान्तरवासिन्यै । तपस्विन्यै नमः । ४००

ॐ समाधिस्थायै नमः । त्रिनेत्रायै । दिविसंस्थितायै ।
सर्वेन्द्रियमनोमात्रे । सर्वभूतहृदिस्थितायै । संसारतारिण्यै ।
विद्यायै । ब्रह्मवादिमनोमलायै । ब्रह्माण्यै । बृहत्यै । ब्राह्म्यै ।
ब्रह्मभूतायै । भयावन्यै । हिरण्यमय्यै । महारात्र्यै ।
संसारपरिवर्तिकायै । सुमालिन्यै । सुरूपायै । तारिण्यै ।
भाविन्यै नमः । ४२०

ॐ प्रभायै नमः । उन्मीलन्यै । सर्वसहायै । सर्वप्रत्ययसाक्षिण्यै ।
तपिन्यै । तापिन्यै । विश्वायै । भोगदायै । धारिण्यै ।
धरायै । सुसौम्यायै । चन्द्रवदनायै । ताण्डवासक्तमानसायै ।
सत्त्वशुद्धिकर्यै । शुद्ध्यै । मलत्रयविनाशिन्यै । जगत्प्रियायै ।
जगन्मूर्त्यै । त्रिमूर्त्यै । अमृताश्रयायै नमः । ४४०

ॐ निराश्रयायै (निरामयायै) नमः । निराहारायै ।
निरङ्कुशरणोद्भवायै । चक्रहस्तायै । विचित्राङ्ग्यै । स्रग्विण्यै ।

पद्मधारिण्यै । परापरविधानज्ञायै । महापुरुषपूर्वजायै ।
विद्येश्वरप्रियायै । अविद्यायै । विद्युज्जिह्वायै । जितश्रमायै ।
विद्यामय्यै । सहस्राक्ष्यै । सहस्रश्रवणात्मजायै ।
सहस्ररश्मिपद्मस्थायै । महेश्वरपदाश्रयायै । ज्वालिन्यै ।
सन्मनसे नमः । ४६०

ॐ व्याप्तायै नमः । तैजस्यै । पद्मरोधिकायै । महादेवाश्रयायै ।
मान्यायै । महादेवमनोरमायै । व्योमलक्ष्म्यै । सिंहस्थायै ।
चेकितान्यै । अमितप्रभायै । विश्वेश्वर्यै । विमानस्थायै । विशोकायै ।
शोकनाशिन्यै । अनाहतायै । कुण्डलिन्यै । नलिन्यै । पद्मवासिन्यै ।
शतानन्दायै । सतां कीर्त्यै नमः । ४८०

ॐ सर्वभूताशयस्थितायै नमः । वाग्देवतायै । ब्रह्मकलायै ।
कलातीतायै । कलावत्यै । ब्रह्मर्षये । ब्रह्महृदयायै ।
ब्रह्मविष्णुशिवप्रियायै । व्योमशक्त्यै । क्रियाशक्त्यै ।
जनशक्त्यै । परायै गत्यै । क्षोभिकायै । रौद्रिकायै । अभेद्यायै ।
भेदाभेदविवर्जितायै । अभिन्नायै । भिन्नसंस्थानायै । वंशिन्यै ।
वंशहारिण्यै नमः । ५००

ॐ गुह्यशक्त्यै नमः । गुणातीतायै । सर्वदायै । सर्वतोमुख्यै ।
भगिन्यै । भगवत्पत्न्यै । सकलायै । कालकारिण्यै । सर्वविदे ।
सर्वतोभद्रायै । गुह्यातीतायै । गुहावल्यै । प्रक्रियायै । योगमात्रे ।
गन्धायै । विश्वेश्वरेश्वर्यै । कपिलायै । कपिलाकान्तायै ।
कनकाभायै । कलान्तरायै नमः । ५२०

ॐ पुण्यायै नमः । पुष्करिण्यै । भोक्त्र्यै । पुरन्दरपुरःसरायै ।
पोषण्यै । परमैश्वर्यभूतिदायै । भूतिभूषणायै ।
पञ्चब्रह्मसमुत्पत्त्यै । परमात्मात्ऽऽमविग्रहायै । नर्मोदयायै ।
भानुमत्यै । योगिज्ञेयायै । मनोजवायै । बीजरूपायै । रजोरूपायै ।
वशिन्यै । योगरूपिण्यै । सुमन्त्रायै । मन्त्रिण्यै । पूर्णायै नमः । ५४०

ॐ ह्लादिन्यै नमः । क्लेशनाशिन्यै । मनोहर्यै । मनोरक्ष्यै ।
तापस्यै । वेदरूपिण्यै । वेदशक्त्यै । वेदमात्रे । वेदविद्याप्रकाशिन्यै ।
योगेश्वरेश्वर्यै । मालायै । महाशक्त्यै । मनोमय्यै ।
विश्वावस्थायै । वीरमुक्त्यै । विद्युन्मालायै । विहायस्यै । पीवर्यै ।

सुरभ्यै । वन्द्यायै नमः । ५६०

ॐ नन्दिन्यै नमः । नन्दवल्लभायै । भारत्यै । परमानन्दायै ।
परापरविभेदिकायै । सर्वप्रहरणोपेतायै । काम्यायै ।
कामेश्वरेश्वर्यै । अचिन्त्यायै । अचिन्त्यमहिम्ने । दुर्लेखायै ।
कनकप्रभायै । कूष्माण्ड्यै । धनरत्नाढ्यायै । सुगन्धायै ।
गन्धदायिन्यै । त्रिविक्रमपदोद्भूतायै । धनुष्पाणये । शिरोहयायै ।
सुदुर्लभायै नमः । ५८०

ॐ धनाध्यक्षायै नमः । धन्यायै । पिङ्गललोचनायै ।
भ्रान्त्यै । प्रभावत्यै । दीप्त्यै । पङ्कजायतलोचनायै । आद्यायै ।
हृत्कमलोद्भूतायै । परायै मात्रे । रणप्रियायै । सत्क्रियायै ।
गिरिजायै । नित्यशुद्धायै । पुष्पनिरन्तरायै । दुर्गायै । कात्यायन्यै ।
चण्ड्यै । चर्चिकायै । शान्तविग्रहायै नमः । ६००

ॐ हिरण्यवर्णायै नमः । रजन्यै । जगन्मन्त्रप्रवर्तिकायै ।
मन्दराद्रिनिवासायै । शारदायै । स्वर्णमालिन्यै । रत्नमालायै ।
रत्नगर्भायै । पृथ्व्यै । विश्वप्रमाथिन्यै । पद्मासनायै ।
पद्मनिभायै । नित्यतुष्टायै । अमृतोद्भवायै । धुन्वत्यै ।
दुष्प्रकम्पायै । सूर्यमात्रे । दृषद्वत्यै । महेन्द्रभगिन्यै ।
मायायै नमः । ६२०

ॐ वरेण्यायै नमः । वरदर्पितायै । कल्याण्यै । कमलायै । रामायै ।
पञ्चभूतवरप्रदायै । वाच्यायै । वरेश्वर्यै (परेश्वर्यै) ।
नन्द्यायै । दुर्जयायै । दुरतिक्रमायै । कालरात्र्यै । महावेगायै ।
वीरभद्रहितप्रियायै । भद्रकाल्यै । जगन्मात्रे । भक्तानां
भद्रदायिन्यै । करालायै । पिङ्गलाकारायै । सामवेदायै नमः । ६४०

ॐ महानदायै नमः । तपस्विन्यै । यशोदायै । यथाध्वपरिवर्तिन्यै ।
शङ्खिन्यै । पद्मिन्यै । साङ्ख्यायै । साङ्ख्ययोगप्रवर्तिकायै ।
चैत्र्यै । संवत्सरायै । रुद्रायै । जगत्सम्पूरण्यै । इन्द्रजायै ।
शुम्भार्यै । खेचर्यै । खस्थायै । कम्बुग्रीवायै । कलिप्रियायै ।
खरध्वजायै । खरारूढायै नमः । ६६०

ॐ पराध्र्यायै नमः । परमालिन्यै । ऐश्वर्यरत्ननिलयायै ।
विरक्तायै । गरुडासनायै । जयन्त्यै । हृद्गुहारम्यायै । सत्त्ववेगायै ।

गणाग्रण्यै । सङ्कल्पसिद्धायै । साम्यस्थायै । सर्वविज्ञानदायिन्यै ।
कलिकल्मषहन्त्र्यै । गुह्योपनिषदे । उत्तमायै । नित्यदृष्ट्यै ।
स्मृत्यै । व्याप्त्यै । पुष्ट्यै । तुष्ट्यै नमः । ६८०

ॐ क्रियावत्यै नमः । विश्वामरेश्वरायै । ईशानायै । भुक्त्यै ।
मुक्त्यै । शिवामृतायै । लोहितायै । सर्वमात्रे । भीषणायै ।
वनमालिन्यै । अनन्तशयनायै । अनाद्यायै । नरनारायणोद्भवायै ।
नृसिंह्यै । दैत्यमथिन्यै । शङ्खचक्रगदाधरायै ।
सङ्कर्षणसमुत्पत्त्यै । अम्बिकोपात्तसंश्रयायै । महाज्वालायै ।
महामूर्त्यै नमः । ७००

ॐ सुमूर्त्यै नमः । सर्वकामदुहे । सुप्रभायै । सुतरां
गौर्यै । धर्मकामार्थमोक्षदायै । भ्रूमध्यनिलयायै ।
अपूर्वायै । प्रधानपुरुषायै । वल्यै (प्रधानपुरुषावल्यै) ।
महाविभूतिदायै । मध्यायै । सरोजनयनासनायै । अष्टादशभुजायै ।
नाट्यायै । नीलोत्पलदलप्रभायै । सर्वशक्त्या समारूढायै ।
धर्माधर्मानुवर्जितायै । वैराग्यज्ञाननिरतायै । निरालोकायै ।
निरिन्द्रियायै नमः । ७२०

ॐ विचित्रगहनायै नमः । धीरायै । शाश्वतस्थानवासिन्यै ।
स्थानेश्वर्यै । निरानन्दायै । त्रिशूलवरधारिण्यै ।
अशेषदेवतामूर्त्यै । देवतायै । परदेवतायै । गणात्मिकायै ।
गिरेः पुत्र्यै । निशुम्भविनिपातिन्यै । अवर्णायै । वर्णरहितायै ।
निर्वर्णायै । बीजसम्भवायै । अनन्तवर्णायै । अनन्यस्थायै ।
शङ्कर्यै । शान्तमानसायै नमः । ७४०

ॐ अगोत्रायै नमः । गोमत्यै । गोप्त्र्यै (गोस्त्रियै) ।
गुह्यरूपायै । गुणान्तरायै । गोश्रियै । गव्यप्रियायै । गौर्यै ।
गणेश्वरनमस्कृतायै । सत्यमात्रायै । सत्यसन्धायै ।
त्रिसन्ध्यायै । सन्धिवर्जितायै । सर्ववादाश्रयायै । साङ्ख्यायै ।
साङ्ख्ययोगसमुद्भवायै । असङ्ख्येयायै । अप्रमेयाख्यायै । शून्यायै ।
शुद्धकुलोद्भवायै नमः । ७६०

ॐ बिन्दुनादसमुत्पत्त्यै नमः । शम्भवे । वामायै । शशिप्रभायै ।
विसङ्गायै । भेदरहितायै । मनोज्ञायै । मधुसूदन्यै । महाश्रियै ।

श्रीसमुत्पत्त्यै । तमःपारे प्रतिष्ठितायै । त्रितत्त्वमात्रे ।
त्रिविधायै । सुसूक्ष्मपदसंश्रयायै । शान्त्यतीतायै । मलातीतायै ।
निर्विकारायै । निराश्रयायै । शिवाख्यायै । चित्रनिलयायै नमः । ७८०

ॐ शिवज्ञानस्वरूपिण्यै नमः । दैत्यदानवनिर्मात्र्यै । काश्यप्यै ।
कालकर्णिकायै । शास्त्रयोन्यै । क्रियामूर्त्यै (प्रियामूर्त्यै) ।
चतुर्वर्गप्रदर्शितायै । नारायण्यै । नवोद्भूतायै । कौमुद्यै ।
लिङ्गधारिण्यै । कामुक्यै । ललितायै । तारायै । परापरविभूतिदायै ।
परान्तजातमहिम्ने (परान्तजातमहिस्त्रे) । वडवायै । वामलोचनायै ।
सुभद्रायै । देवक्यै नमः । ८००

ॐ सीतायै नमः । वेदवेदाङ्गपारगायै । मनस्विन्यै । मन्युमात्रे ।
महामन्युसमुद्भवायै । अमृत्यवे । अमृतास्वादायै । पुरुहूतायै ।
पुरुप्लुतायै (पुरुष्टुतायै) । अशोच्यायै । भिन्नविषयायै ।
हिरण्यरजतप्रियायै । हिरण्यायै । राजितायै । हैम्यै ।
हेमाभरणभूषितायै । विभ्राजमानायै । दुर्ज्ञेयायै ।
ज्योतिष्टोमफलप्रदायै । महानिद्रासमुद्भूतायै नमः । ८२०

ॐ बलीन्द्रायै नमः । सत्यदेवतायै । दीर्घायै । ककुद्मिन्यै ।
विद्यायै । शान्तिदायै । शान्तिवर्द्धिन्यै । लक्ष्म्यादिशक्तिजनन्यै ।
शक्तिचक्रप्रवर्तिकायै । त्रिशक्तिजनन्यै । जन्यायै ।
षडूर्मिपरिवर्जितायै । स्वाहायै । कर्मकरण्यै । युगान्तदलनात्मिकायै ।
सङ्कर्षण्यै । जगद्धात्र्यै । कामयोन्यै । किरीटिन्यै ।
ऐन्द्र्यै नमः । ८४०

ॐ त्रैलोक्यनमितायै नमः । वैष्णव्यै । परमेश्वर्यै ।
प्रद्युम्नदयितायै । दान्तायै । युग्मदृष्ट्यै । त्रिलोचनायै ।
महोत्कटायै । हंसगत्यै । प्रचण्डायै । चण्डविक्रमायै ।
वृषावेषायै । वियन्मात्रायै । विन्ध्यपर्वतवासिन्यै ।
हिमवन्मेरुनिलयायै । कैलासगिरिवासिन्यै । चाणूरहन्त्र्यै । तनयायै ।
नीतिज्ञायै । कामरूपिण्यै नमः । ८६०

ॐ वेदविद्याव्रतरतायै नमः । धर्मशीलायै । अनिलाशनायै ।
अयोध्यानिलयायै । वीरायै । महाकालसमुद्भवायै । विद्याधरक्रियायै ।
सिद्धायै । विद्याधरनिराकृत्यै । आप्यायन्त्यै । वहन्त्यै । पावन्यै ।

पोषिण्यै । खिलायै । मातृकायै । मन्मथोद्भूतायै । वारिजायै ।
वाहनप्रियायै । करीषिण्यै । स्वधायै नमः । ८८०

ॐ वाण्यै नमः । वीणावादनतत्परायै । सेवितायै । सेविकायै । सेवायै ।
सिनीवाल्यै । गरुत्मत्यै । अरुन्धत्यै । हिरण्याक्ष्यै । मणिदायै ।
श्रीवसुप्रदायै । वसुमत्यै । वसोर्धारायै । वसुन्धरासमुद्भवायै ।
वरारोहायै । वरार्हायै । वपुःसङ्गसमुद्भवायै । श्रीफल्यै ।
श्रीमत्यै । श्रीशायै नमः । ९००

ॐ श्रीनिवासायै नमः । हरिप्रियायै । श्रीधर्यै । श्रीकर्यै ।
कम्पायै (कम्प्रायै) । श्रीधरायै । ईशवीरणायै । अनन्तदृष्ट्यै ।
अक्षुद्रायै । धात्रीशायै । धनदप्रियायै । दैत्यसिंहानां निहन्त्र्यै ।
सिंहिकायै । सिंहवाहिन्यै । सुसेनायै । चन्द्रनिलयायै । सुकीर्त्यै ।
छिन्नसंशयायै । बलज्ञायै । बलदायै नमः । ९२०

ॐ वामायै नमः । लेलिहानायै । अमृताश्रवायै । नित्योदितायै ।
स्वयञ्ज्योतिषे । उत्सुकायै । अमृतजीविन्यै । वज्रदंष्ट्रायै ।
वज्रजिह्वायै । वैदेह्यै । वज्रविग्रहायै । मङ्गल्यायै । मङ्गलायै ।
मालायै । मलिनायै । मलहारिण्यै । गान्धर्व्यै । गारुड्यै । चान्द्र्यै ।
कम्बलाश्वतरप्रियायै नमः । ९४०

ॐ सौदामिन्यै नमः । जनानन्दायै । भ्रुकुटीकुटिलाननायै ।
कर्णिकारकरायै । कक्षायै । कंसप्राणापहारिण्यै । युगन्धरायै ।
युगावर्त्तायै । त्रिसन्ध्यायै । हर्षवर्धिन्यै । प्रत्यक्षदेवतायै ।
दिव्यायै । दिव्यगन्धायै । दिवापरायै । शक्रासनगतायै । शाक्र्यै ।
साध्व्यै । नार्यै । शवासनायै । इष्टायै नमः । ९६०

ॐ विशिष्टायै नमः । शिष्टेष्टायै । शिष्टाशिष्टप्रपूजितायै ।
शतरूपायै । शतावर्त्तायै । विनीतायै । सुरभये । सुरायै ।
सुरेन्द्रमात्रे । सुद्युम्नायै । सुषुम्नायै । सूर्यसंस्थितायै ।
समीक्षायै । सत्प्रतिष्ठायै । निर्वृत्त्यै । ज्ञानपारगायै ।
धर्मशास्त्रार्थकुशलायै । धर्मज्ञायै । धर्मवाहनायै ।
धर्माधर्मविनिर्मात्र्यै नमः । ९८०

ॐ धार्मिकाणां शिवप्रदायै नमः । धर्मशक्त्यै ।
धर्ममय्यै । विधर्मायै । विश्वधर्मिण्यै । धर्मान्तरायै ।

धर्ममध्यायै । धर्मपूर्वायै । धनप्रियायै । धर्मोपदेशायै ।
धर्मात्मने । धर्मलभ्यायै । धराधरायै । कपाल्यै ।
शाकलामूर्त्यै । कलाकलितविग्रहायै । धर्मशक्तिविनिर्मुक्तायै
(सर्वशक्तिविनिर्मुक्तायै) । सर्वशक्त्याश्रयाश्रयायै । सर्वायै ।
सर्वेश्वर्यै नमः । १०००

ॐ सूक्ष्मायै नमः । सुसूक्ष्मज्ञानरूपिण्यै । प्रधानपुरुषेशानायै ।
महापुरुषसाक्षिण्यै । सदाशिवायै । वियन्मूर्त्यै । देवमूर्त्यै ।
अमूर्तिकायै । १००८

इति वाल्मीकिविरचिते अद्भुतरामायणे पञ्चविंशति सर्गान्तर्गता
श्रीरामकृता सीतासहस्रनामावलिः समाप्ता ।

For the records, there are 965 unique names

Proofread by PSA Easwaran

*Shri Sitasahasranamavali*

pdf was typeset on September 2, 2024

Please send corrections to *sanskrit@cheerful.com*